CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. B.
Coll. No. 165

Title Bahvṛcabrāhmaṇopaniṣadbhāṣya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 165 Subject: Vedanta

Title: Bṛhadāraṇyakopaniṣad —
& Aitareya brāhmaṇopaniṣadbhāṣya

Author: Śaṅkara Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 4'3" by 3' 4" Extent: 14 fol

Language: Sanskrit Script: devanāgarī.

Remarks: Complete.

ऐतरेय्युपनिषद्भाष्ये। आत्मषट्कं।

विलोकयन्त्युपश्यन्ति ये मां ब्राह्मणमेव च। कृतकर्मतया मूढाः पच्यन्ते नरके ध्रुवं॥१

ये वा मूढा दुरात्मानो भिन्नं पश्यन्ति मां हरेः। ब्राह्मणं च तथात्मानं मूढा एव स्युरासमं तव॥२

एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्जं खर्व

पद निखर्वमहापद्मशंकवस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्ध्यमिति

दशगुणोत्तरसंज्ञाः संख्यानां व्यवहारार्थं कृताः पूर्वैः॥१॥

संख्यायाः नौ

कूटाहः जर्हं तमः अयुतं। महत्तत्वं कोटिः

अहंकार अर्बुदः। वायुः पद्मं। तेजः खर्वः

आपः निखर्वः। पृथिवी महापद्मं

१ ॐ श्रीरामाय नमः। ॐ परिसमाप्तं कर्म सहापरब्रह्मविषयवि[illegible]ज्ञानेन। एषा कर्मणो ज्ञानसहितस्य परा गतिरु
क्थविज्ञान[illegible]द्वारेणोपसंहृता। एतत्सत्यं ब्रह्म प्राणाख्यमेष एको देव एतस्यैव प्राणस्य सर्वे देवा विभूतयः एतस्य प्राणस्यात्मभावं
गच्छन्देवता अप्येतीत्युक्तं सोयं देवताप्ययलक्षणः परमपुरुषार्थ एष मोक्षः स चायं यथोक्तेन ज्ञानकर्मसमुच्चयसाधनेन प्राप्त
व्यो नातः परमस्तीत्येके प्रतिपन्नास्तान्निराचिकीर्षु[illegible]स्तत्केवलात्मविद्याविधानार्थमात्मा वा इदमित्याह। कथं पुनः कर्मसंबंधि
त्वलात्मविज्ञानविधानार्थमुत्तरो ग्रन्थ इति गम्यते। अन्यार्थानवगमात्तथा च सर्वेषां देवतानामग्न्यादीनां संसारित्वं दर्शयि
ष्यति अशनायादिदोषवत्वेन तमशनायापिपासाभ्यामन्ववार्जदित्या[illegible]दिना। अशनायादिमत्सर्वं संसार एव परस्तु ब्रह्मणोऽ
शनायाद्यत्ययश्रुतेः। नन्वेवं केवलात्मज्ञानं मोक्षसाधनं कर्म्मेवाधिक्रियते विशेषाश्रवणात् कर्मिण आत्मनस्तस्य चाश्रव
णात्कर्म च बृहती सहस्रलक्षणं प्रस्तुत्यानंतरमेवात्मज्ञानमारभ्यते तस्मात्कर्म्यैवाधिक्रियते न च कर्मसंबंधि आत्मज्ञानं पू
र्ववदुत्तरत्र उपसंहारात् यथा कर्मसंबंधिनः पुरुषस्य सूर्यात्मनः स्थावरजंगमादि सर्वप्राण्यात्मत्वं मंत्रेण च सूर्य आत्मेत्यादिना
तथैवैष ब्रह्मैष इंद्र इत्याद्युपक्रम्य सर्वप्राण्यात्मत्वं यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रमित्युपसंहरिष्यति तथा च संहितोपनिष
दि एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत इत्यादिना कर्मसंबंधित्वमुक्त्वा सर्वेषु भूतेष्वेतमेव ब्रह्मेत्या[illegible]चक्षत इत्युपसंहृ
रति तथा तस्यैव योयमशरीरः प्रज्ञात्मेत्युपक्रम्य इहापि कोयमात्मेत्युपक्रम्य प्रज्ञानमेव प्रज्ञानं ब्रह्मेति दर्शयिष्यति
तस्मान्न कर्मसंबंधात्मज्ञानं पुनरुक्त्यानर्थक्यमिति चेत्प्राणो वा अहमस्मि ऋषे इत्यादि ब्राह्मणेन सूर्य आत्मेति निर्द्धा

रितस्यात्मन आत्मैवेदमित्यादि ब्राह्मणेन कोयमात्मेति प्रश्नपूर्वकं पुनर्निर्द्धारणं पुनरुक्तमिति चेन्न तस्यैव धर्मान्तरनिर्द्धारणा
र्थत्वान्न पुनरुक्तता दोषः कथं तस्यैव कर्मसंबंधिनो जगत्सृष्टिस्थितिसंहारादि धर्मविशेषनिर्द्धारणार्थत्वात्केवलोपास्यार्थत्वा
द्वा आत्मेत्यादि परः संदर्भ आत्मनः कर्मिणः अन्य उपासना अन्यो कर्मप्रस्तावे विहितत्वात्केवलोप्यात्मा उपास्य एवमर्थः। भेद
भेदोपास्यत्वाद्वैक एवात्मा कर्मविषये भेददृष्टिभाक्स एव अकर्मकाले अभेदेन उपास्य इत्येवमप्यपुनरुक्तता विद्यां चाविद्यां च
यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति वादिनां
वा न च वर्षशतात्परमायुर्मर्त्यानां येन कर्मक्षयादात्मानमुपासीत दर्शितं च तावति पुरुषायुषोऽह्नां सहस्राणि भवं
ति वर्षशतं चायुः कर्मणैव व्याप्तं दर्शितं मंत्रः कुर्वन्नेवेहेत्यादिः। तथा यावज्जीवमग्निहोत्रं जुहोति। यावज्जीवं दर्शपूर्णमा
स्तु साभ्यां यजेतेत्येवमाद्याश्च। तं यज्ञपात्रैर्दहंतीति च ऋणत्रयश्रुतेश्च तत्र पारिव्राज्यादिविधायकाद्यभिप्राया चर्यं चिरं तीत्या
द्यात्मज्ञानस्तुतिपरोर्थवादः अनधिकृतार्थो वा न परमार्थतत्त्वविज्ञाने फलादर्शने क्रियानुपपत्तेः। यदुक्तं कर्मिण एवात्मज्ञानं
कर्मसंबंधित्वेत्यादि तन्न परस्याप्तकामं सर्वसंसारदोषवर्जितं ब्रह्माहमस्मीत्यात्मत्वेन विज्ञाते तेन कर्तव्येन वा प्रयोजनं
मात्मनोपश्यतः फलादर्शने क्रिया नोपपद्यते फलादर्शनेपि नियुक्तत्वात्करोतीति चेन्न नियोगाविषयात्मदर्शनादिष्टयोग
मनिष्टवियोगं वा आत्मनः प्रयोजनं पश्यंस्तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके न तु तद्विपरीतो नियोगा
विषयब्रह्मात्मदर्शी ब्रह्मात्मत्वदर्शनेपि [illegible] नियुक्त एतु नियोगाविषयोपि सन्न कश्चिन्नियुक्त इति सर्वं कर्म सर्वेणास्य सर्वदा
कर्तव्यं प्राप्नोतीति तच्चानिष्टं न च स नियोक्तुं शक्यते केनचिदात्मनोम्नायस्यापि तत्प्रभवत्वान्न हि स्वविज्ञानेनोक्ति न वचसा

२ स्वयंनियुज्यतेनापिबद्धविद्वस्वामीअविवेकेनमत्तेनआम्नायस्यनित्यत्वेसतिस्वातंत्र्यासंवर्न्प्रतिनियोक्तृत्वसामर्थ्यमिति
चेन्नउक्तदोषात्तथापिसर्वेणासर्वदासर्वंविशिष्टकर्मकर्त्तव्यमित्येकोदोषोपरिहार्यएवतदपिशास्त्रेणैवविधीयतइतिचेद्व
थाकर्मकर्त्तव्यताशास्त्रेणैवज्ञातातद्ध्यात्मज्ञानंतस्यैवकर्मिणःशास्त्रेणैवविधीयतइतिचेन्नविरुद्धार्थबोधकत्वानुपपत्तेः
नह्येकस्यज्ञातात्ततसंबंधित्वंतद्विपरीतत्वंचबोधयितुंशक्यंशीतोष्णत्वमिवाग्नेःनचैवंसद्योगचिकीर्षानिष्टवियोगचि
कीर्षाचशास्त्रज्ञतासर्वप्राणिनांतद्दर्शनाच्छास्त्रज्ञतंत्वेवंतद्भयंगोपालांगनादीनांनद्रष्टमतअशास्त्रज्ञत्वात्तेषांयद्धिश्च
तासांतत्शास्त्रेणैवबोधयितव्यंतत्रैवज्ञातकर्तव्यताविरोध्यात्मनांशास्त्रेणज्ञातंकथंतद्विरुद्धांकर्त्तव्यतांपुनरुत्पाद
येद्धीततामिवाग्नौतमइवचभानौनबोधयत्येवेतिचेन्नसमस्त्यात्मेतिविद्यात्मज्ञानंफलेतिचोपसंहारात्तदात्मानमेवावे
त्त्वमसीत्येवमादिवाक्यानांतत्पराद्वैतुत्पन्नस्यचफलात्मविज्ञानस्यचाबाध्यमानत्वात्अनुत्पन्नंभ्रांतिवेतिशक्यंवक्तुंसा
ऽपिप्रयोजनाभावस्यतुल्यत्वादितिचेन्नकृततेनेहकश्चनेतिस्मृतेर्यत्राङ्गु … वेदित्वाफलवक्तव्यानमेवकुर्यादितिते
षामप्येषसमानोदोषःप्रयोजनाभावइतिचेन्नक्रियामात्रत्वाद्युक्तानस्य।अविद्यानिमित्तोहिप्रयोजनस्याभावोनवस्तुध
र्मःसर्वप्राणिनांतद्दर्शनात्प्रयोजनतृष्णयाचप्रेर्यमाणस्यवाङ्मनःकायैःप्रवृत्तिदर्शनात्सोऽकामयतजायामेस्यादित्यादिपुत्र
वित्तादिपांक्तलक्षणकाम्यत्वेवेतिउभेह्येतेसाध्यसाधनलक्षणेएषणेएवेतिवाजसनेयिब्राह्मणेअवधारणाद्विद्या
कामदोषनिमित्तायावाङ्मनःकायप्रवृत्तेःपांक्तलक्षणायाविदुषोऽविद्यादिदोषानुपपत्तेरुत्सावाक्रियानामभावमात्रफलत्वा २
नंतत्यागादिवदन्वेष्टव्यस्वरूपभावात्कैतत्त्वविद्यावत्पुरुषःधर्मेतिनप्रयोजनमन्वेष्टव्यंनहितमसिप्रवृत्तस्यउदितआ

ये ३

लोकेयत्कर्त्तकंटकाद्यपतनंतत्किंप्रयोजनमितितंप्रत्याहेहवृक्षानंतरार्थप्रासत्वान्नचोदनार्हइतिगार्हस्थ्येचे त्यत्र
विज्ञानंजातंतत्रैवासक्तात्रकुर्वतआसनंनततोन्यत्रगमनमितिचेन्नकामप्रयुक्तत्वाद्गार्हस्थ्यस्यएतावान्वैकामइतिनेद्धि
तएषणेएवेत्यवधारणात्कामनिमित्तपुत्रवित्तादिसंबंधनियमाभावमात्रंहिततोऽन्यत्रगमनंमुक्त्वाअनुच्यतेअतोनगार्हस्थ्य
एवाकुर्वतआसनमुपपन्नंद्वितीयस्याएतेनगुरुशुश्रूषातपसोरप्यप्रतिपत्तिर्विदुषःसिद्धा।अत्रकेचिद्गृहस्थाभिक्षाटनादि
भयात्परित्रस्यमानाःसूक्ष्मदृष्टितांदर्शयंतउत्तरमाहुःभिक्षाटनादिनियमदर्शनाद्देहधारण
मात्रार्थिनोगृहस्थस्यापिसाध्यसाधनेषणोभयविनिर्मुक्तस्यदेहमात्रधारणार्थमशनाच्छादनाभावमुपजीवतोगृहएवास्त्वा
सनमितिनास्वगृहविशेषपरिग्रहनियमस्यकामप्रयुक्तत्वादित्युक्तोत्तरत्वात्स्वगृहविशेषपरिग्रहाभावेचशरीरधारण
मात्रप्रयुक्ताशनाच्छादनार्थिनःस्वपरिग्रहविशेषाभावेऽर्थसिद्धत्वमेवशरीरधारणार्थायांभिक्षाटनादिप्रवृत्तौयथानियमोऽभि
क्षोःशौचादौवर्तमानस्यगृहिणोविदुषःकामिनस्तुनित्यकर्मसुनियमेनप्रवृत्तिर्यथाजीवादिश्रुतिभिरुक्तत्वादप्रत्यवायपरिहारा
येत्येतन्नियोगाविषयत्वेनविदुषःप्रयुक्तमशक्यंनियोक्तुंयावज्जीवादि … नित्यचोदनानर्थकमितिचेन्न
अविद्वद्विषयेअर्थवत्त्वाद्यतुभिक्षोःशरीरधारणमात्रप्रवृत्तस्यप्रवृत्तेर्नियतत्वंतत्रवृत्तेर्नप्रयोजकमाचमनप्रवृत्तस्यपि
पासाशमनवन्नान्यप्रयोजनार्थत्वमवगम्यतेनचाग्निहोत्रादीनांतद्वदर्थप्राप्तप्रवृत्तिनियतत्वोपपत्तिरर्थप्राप्तप्रवृत्ति
नियमोपिप्रयोजनाभावेनुपपन्नएवेतिचेन्नतन्नियमस्यपूर्वप्रवृत्तिसिद्धत्वान्नदतिक्रमेयत्नगौरवाद्दर्थप्राप्तस्य
चकृत्स्नस्यपुनर्वचनाद्विविदिषोर्मुमुक्षोःकर्तव्यत्वोपपत्तेर्विदुषापिमुमुक्षुणापारिव्राज्यंकर्तव्यमेवतथाचशांतो
दांतइत्यादिवचनेशमदमादीनांचात्मदर्शनसाधनानामन्याश्रमेष्वनुपपत्तेःन्यासइतिब्रह्मापरःपरंपवित्रंप्रावाचसम्य

घ

२ ग्रवि संकृष्टमिति च श्रुतेः ताश्वतरे विज्ञायते न कर्म्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति च ज्ञात्वा नैष्कर्म्य
माचरेदिति च स्मृतेः ब्रह्मा श्रमपदे वसेदिति च ब्रह्मचर्यादि विद्या साधनानां च साकल्येनात्यन्तमिष्टुपपत्तेः गार्हस्थ्ये
ऽस्मिन्नवाप्तिवासंपन्नेः साधनं कस्यचिदर्थस्य साधनायाऽलं यद्विज्ञानयोगी नि च गार्हस्थ्याश्रमकर्म्माणि तेषां परं फलमु
पसंहृतं देवताप्ययलक्षणं संसारविषयमेव यदि कर्म्मण एव परमात्मज्ञानमभविष्यत् संसारविषयस्यैव फलस्योपसं
हारो नोपपद्यत। अंगफलं तदिति चेन्न तद्विरोधात्मवस्तुविषयत्वादात्मविद्याया निराकृतसर्वनामरूपकर्म्मपर
मार्थात्मवस्तुविषयं ज्ञानममृतत्वसाधनं गुणफलसंबंधे हि निराकृत सर्वविशेषात्मविषयत्वं विज्ञानस्य न प्राप्नोति श्वा ति
निष्टं यत्रत्वस्य सर्वमात्मैवाभूदिति यच्छिनत्ति क्रियाकारकफलादि सर्वव्यवहारनिराकरणं विदुषः तद्विपरीतस्या
विदुषो यत्र यत्र हि द्वैतमिव तदित्या क्रियाकारकफलरूपस्यैव संसारस्य दर्शितत्वाच्चवाजसनेयेपि ब्राह्मणे तथेहापि उ
देवताप्ययं संसारविषयं फलमशनायादिमद्वस्त्वात्मकं तत्फलमुपसंहृत्य केवलं सर्वात्मविषय वस्तु विषयं ज्ञानं अ
मृतत्वाय वक्ष्यामीति प्रवर्त्तते ऋणप्रतिबंधश्चाविदुष एव मनुष्य देव पितृलोक प्राप्ति प्रतियत्नो न विदुषः सोयं मनुष्यलो
कः पुत्रेणैवेत्यादि लोकत्रय साधन नियमश्रुतेः विदुषश्चर्णप्रतिबंधाभावो दर्शित आत्मलोकार्थिनः किं प्रजयाकरि
ष्याम इत्यादिना तथैतद्ध स्म वै तद्विद्वांस आहुः ऋषयः कावषेया इत्यादि एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं जुहवांचक्रुरिति
च कौषीतकीनामविदुषस्तर्ह्यृणापाकरणे पारिव्राज्यान्नुपपत्तिरिति चेन्न प्राग्गार्हस्थ्य प्रतिपत्तेर्ऋणित्वासंभवाद धिका
रानारूढोप्यृणी चेत्स्यात् सर्वस्य ऋणित्वमिति स निष्टत्वं प्रसज्येत अप्रतिपन्नगार्हस्थ्यस्यापि गृहा द्वनी त्वा प्रव्रजेद्य २

त१

दि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वनाद्वेत्यात्मदर्शनोपायसाधनत्वेनैष्यत एव पारिव्राज्यं यावज्जीव
श्रुतीनामविद्वदमुमुक्षुविषयेत्तार्थता। छांदोग्ये केषांचिद् द्वादशरात्रमग्निहोत्रं कृत्वा ततऊर्द्ध्वं परित्यागः श्रू
यते यच्चानधिकृतानां पारिव्राज्यमिति तन्न तेषां पृथगेवोसंन्नाग्निरनग्निको वेत्यादि श्रवणात् सर्वस्मृतिषु चाविशे
षेणाश्रमविकल्पः प्रसिद्धः समुच्चयश्च यत्तु विदुषोऽर्थप्राप्तं व्युत्थानं इत्यशास्त्रार्थत्वे गृहे वने वा तिष्ठतो न विशेष इति
तदसद्व्युत्थानस्यैवार्थप्राप्तत्वात् नान्यत्रावस्थानं मन्यत्रावस्थानस्य कामकर्म्मप्रयुक्तत्वं ह्यवोचाम तदभावमात्रं च व्यु
त्थानमिति च यथा कामित्वं तु विदुषोत्यंतमप्राप्तम त्यंतमूढविषयत्वेनावगमात् तथा शास्त्रचोदितमपि कर्म्मा
त्मविदो प्राप्तं गुरुभारतयावगम्यते किमु तात्यंताविवेकनिमित्तं यथाकामित्वं न ह्युन्मादतिमिरदृष्ट्युपलब्धं व
स्तु तदपगमेपि तथैव स्यादुन्मादतिमिरदृष्टिनिमित्तत्वादेव तस्य तस्मादात्मविदो व्युत्थानव्यतिरेकेण न यथाकामित्वं
न चान्यत्कर्त्तव्यं इत्येतत्सिद्धं यत्तु विद्यां चाविद्यां च यस्तद्वेदोभयं सह इति न तत्र विद्यावतो विद्यया सहाविद्यापि वर्त्तत इ
त्ययमर्थः कस्तर्ह्येकस्मिन्पुरुषे ———— तेन सह संबध्येयाता मित्यर्थः यथा शुक्तिकायां रजतं शुक्तिकाज्ञाने एकस्य
पुरुषस्य द्वूरमेते विपरीते विसूची अविद्यया च विद्येति ज्ञाता ते ति हि काठके तस्मान्न विद्यायां सत्यामविद्यास
भवोस्ति तपसा ब्रह्म विजिज्ञासस्वेत्यादि श्रुतेस्तप आदि विद्योत्पत्ति साधनं गुरूपासनादि च कर्म्माविद्यात्मक
त्वादविद्योच्यते तेन विद्यामुत्पाद्य मृत्युं काममतितरति ततो निष्काम त्यक्तैषणो ब्रह्मविद्ययामृतत्वमश्नुत इत्येत

४ मर्थमाह । विद्ययामृतमश्नुत इति । यत्तु पुरुषायुः सर्वं कर्मणैव व्याप्तं कुर्वन्नेवेह कर्माणि जिजी
विषेच्छतं समा इत्यविद्वद्विषयत्वेन परिहृतमितरथा संभवात् । यत्तु वक्ष्यमाणमपि पूर्वोक्तेन तुल्यत्वात्कर्मणा विरुध्यमा
नत्वात्कामिनमिति तत्सविशेषतया प्रत्यक्षमन्त्रव्याख्यानेन च दर्शयिष्यामोऽतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्याप्रदर्श
नार्थ उत्तरो ग्रन्थ आरभ्यते । आत्मा आप्नोतेरत्तेर्वा परः सर्वज्ञः सर्वशक्तिरशनायादि सर्वसंसारधर्मवर्जितो नित्य
शुद्धबुद्धमुक्तस्वभावोऽजोऽजरोऽमृतोऽमरोऽभयोऽद्वयो वै इदं यदुक्तं नामरूपभेदभिन्नं जगदात्मैवाग्रे जगतः सृष्टेः प्रागासी
त्किं नेदानीं स एवैको न कथं तर्ह्यासीदित्युच्यते यद्यपीदानीं स एवैकस्तथाप्यस्ति विशेषः प्रागुत्पत्तेरव्याकृतनामरूपभे २६
दमात्मभूतमात्मैकशब्दप्रत्ययगोचरं जगदिदानीं व्याकृतनामरूपभेदत्वादनेकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्यय
गोचरं चेति विशेषो यथा सलिलात्पृथङ्नामरूपव्याकरणात्प्राक् सलिलैकशब्दप्रत्ययगोचरमेव फेनं यदा सलिला
त्पृथङ्नामरूपभेदेन व्याकृतं भवति तदा सलिलं फेनं चेत्यनेकशब्दप्रत्ययभाक् सलिलमेवेति एकशब्दप्रत्यय
भाक् फेनं भवति तद्वत् । नान्यत्किंचन नकिंचिदपि । [illegible] मिषन्निमिषद्व्यापारव
दितरद्वा यथा सांख्यानामनात्मपक्षपाति स्वतन्त्रं प्रधानं काणादानामणवो न तद्वदिहा[illegible]न्यदात्मनः किंचिद
पि वस्तु विद्यत इति तर्ह्यात्मैवैक आसीदित्यभिप्रायः । स सर्वज्ञस्वाभाव्यादात्मैकः सन्नीक्षत प्रागुत्पत्तेरकारणत्वात्कथमी
१त्व क्षितवानित्यायं दोषः सर्वज्ञस्वाभाव्यात्तथा च मन्त्रवर्णोऽपाणिपादो जवनो ग्रहीतेत्यादिरनेनाभिप्रायेणेत्याह लोकान्नु अम्भ
तीन्प्राणिकर्मफलोपभोगस्थानभूतान्नु सृजै सृजेऽहमित्येवमीक्षितवान्स आलोच्य स इमाँल्लोकानसृजत ४

सृष्टवान्यथेह बुद्धिमांस्तक्षादिरेवंप्रकारान्प्रासादादीन्सृजेय इतीक्षित्वानन्तरमेव प्रासादादीन्सृजति तद्वत् । ननु सोपादा
नस्तक्षादिः प्रासादादीन्सृजतीति युक्तं निरुपादानस्त्वात्मा कथं लोकान्सृजतीति नैष दोषः सलिलफेनस्थानीये आत्मभूते ना
मरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगत उपादानभूते संभवतः तस्मादात्मभूतनामरूपोपादानभूत्
सर्वज्ञो जगन्निर्मिमीत इत्यविरुद्धम् । अथवा विज्ञानवान्यथा मायावी निरुपादान आत्मानमेवात्मान्तरत्वेनाकाशे गच्छन्तमिव नि
र्मिमीते तथा सर्वज्ञो देवः सर्वशक्तिर्महामाय आत्मानमेवात्मान्तरत्वेन जगद्रूपेण निर्मिमीत इति युक्ततरं तस्मिन्नेवं सति कारण
कार्योत्पत्तिवादिपक्षाश्च न प्रसज्यन्ते सुनिराकृताश्च भवन्ति कान्लोकान्सृजतेत्याह । अम्भो मरीचीर्मरमापः इमांल्लोकानाकाशादिक्र आ
१न मेणाण्डमुत्पाद्यांभःप्रभृतीन्लोकानसृजत । तत्राम्भःप्रभृतीन्स्वयमेव व्याचष्टे श्रुतिः । अदस्तदम्भःशब्दवाच्यो लोकः परेण दिवं द्युलो
कात्परेण परस्तात्सोऽम्भःशब्दवाच्योऽम्भोभरणात् । द्यौः प्रतिष्ठाश्रयस्तस्याम्भसो लोकस्य द्युलोकादधस्ताद् अन्तरिक्षं यत्तन्मरीचयः ।
एकोऽप्यनेकस्थानभेदत्वाद्बहुवचनं मरीचय इति मरीचिभिर्वा रश्मिभिः संबन्धात् पृथिवी मरः म्रियन्तेऽस्मिन्भूतानीति २९
मरः या अधस्तात्पृथिव्यास्ता आप उच्यन्ते सर्वप्राणिकर्मफलोपादानादाप्नोतेर्लोका यद्यपि पञ्चभूतात्मकत्वं लोकानाम
[illegible]बाहुल्यादब्नामभि[illegible]रेवाम्भो मरीचिर्मरमाप इति उच्यन्ते सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतांश्चतुरो लोकान्
सई सृष्ट्वा स ईश्वरः पुनरेवैक्षत इमे नु अम्भःप्रभृतयो मया सृष्टा लोकाः परिपालयितृवर्जिता विनश्येयुः तस्मादेषां रक्षार्थं लोकपाला
ल्लोकानां पालयितॄन्नु सृजै [illegible] इत्येवमीक्षित्वा सोऽद्भ्य एवाप्प्रधानेभ्य एव पञ्चभूतेभ्योऽम्भःप्रभृतीन्लोकान्सृष्टवान्तेभ्य
एवेत्यर्थः पुरुषाकारं शिरःपाण्यादिमन्तं समुद्धृत्याद्भ्यः समुपादाय मृत्पिण्डमिव कुलालः पृथिव्या अमूर्छयत् मूर्छितवान् ।

पुरुषं । ५२ २मोपे

५ पिंडितवांस्त्वावयवसंयोजनेनेत्यर्थः। तं पिंडं पुरुषविधमुद्दिश्याभ्यतपदभिध्यानं संकल्पं कृतवानित्यर्थः यस्य ज्ञानमयं तपः तस्या
भितप्तस्य तस्याभितप्तस्येश्वरसंकल्पेन तपसाभितप्तस्य पिंडस्य मुखं निरभिद्यत मुखाकारं सुषिरमजायत यथा पक्षिणोंडं भिद्यते
एवं च तस्माच्च निर्भिन्नान्मुखाद्वाक् करणमिंद्रियं निरभिद्यत तदधिष्ठाताग्निस्ततो वाचो लोकपालः तथा नासिके निरभिद्ये
तां नासिकाभ्यां प्राणः प्राणाद्वायुरिति सर्वत्राधिष्ठानं करणं च देवता च त्रयं क्रमेण निर्भिन्नमिति अक्षिणी कर्णौ [illegible] हृदयं
अंतःकरण [illegible] धिष्ठानं मनोंतःकरणं नाभिः सर्वप्राणबंधनस्थानं तस्मादपानसंयुक्तत्वादपान इति पाय्विंद्रियमुच्यते तस्याधि
ष्ठात्री देवता मृत्युः यथान्यत्र तथा शिश्नं निर्भिद्यत प्रजननेंद्रियस्थानमिंद्रियं रेतो विसर्गार्थत्वात्सह रेतसोच्यते रेतइतितां
संकल्प नेऽ एता अग्न्याद्या देवता [illegible] लोकपालत्वेन संकल्प्य सृष्टा ईश्वरेणास्मिन्संसारार्णवे संसारसमुद्रे महत्यर्णसमुद्रे महति अविद्या वे३
कामप्रभवदुःखोदके तीव्ररोगजरामृत्युमहाग्राहे नादावनंतेऽपारे निरालंबे विषयेंद्रियजनितसुखलव [illegible] क्षणविश्रा
मे पंचेंद्रियार्थतृष्णामारुतविक्षोभोत्थितानर्थशतमहोर्मिमाले महारौरवाद्यनेकनिरयगतहाहेत्यादिकूजिताक्रोशनोद्भू
त महारवे सत्यार्जवदानदयाऽहिंसाशमदमधृत्याद्यात्मगुणपाथेयपूर्णज्ञानोडुपे सत्संगसर्वत्यागमार्गे मोक्षती
रे एतस्मिन्महत्यर्णवे प्रापतन्पतिताः [illegible] तस्मादस्यादिदेवताप्ययलक्षणापि या गतिर्व्याख्याता ज्ञानकर्मसमुच्चयानुष्ठा
नफलभूता सापि नालं संसारदुःखोपशमनायेत्येवं विवक्षितोऽर्थोऽत्र यत एवं तस्मादेवं विदित्वा परं ब्रह्मात्मा [illegible] नः सर्वभूता
नां च योऽविशिष्यमाणविशेषः प्रकृतस्य जगदुत्पत्तिस्थितिसंहारहेतुत्वेन सर्वसंसारदुःखोपशमनाय वेदितव्यः तस्मादेवं पश्या
एतत्कर्मैतत् कृतमेतत्सत्यं यदेतत्परमात्मज्ञानं नान्यः पंथा विद्यते यनायेति मंत्रवर्णात्तथा तं करणदेवतोत्पत्तिबीजभूतं पुरु ५
१स्थान

५स्त्वावयवेनसंयोज्य

षं प्रथमोत्पादितं पिंडमात्मानमशनापिपासाभ्यामन्ववासृजदनुगमितवान्संयोजितवानित्यर्थः तस्य कारणात्मत्वात्तस्मा
शनायादिदोषवत्त्वात्तत्कार्यभूतानामपि देवतानामशनायादिमत्त्वं तास्ततोऽशनापिपासाभ्यां पीड्यमाना एनं पिता पी:
महं स्रष्टारमब्रुवन्नुक्तवत्य आयतनमधिष्ठानं नोऽस्मभ्यं प्रजानीहि विधत्स्व यस्मिन्नायतने प्रतिष्ठिताः समर्थाः सत्यो
ऽन्नमदामाभक्षयामेत्येवमुक्त ईश्वरस्ताभ्यो देवताभ्यो गां गवाकृतिविशिष्टं पिंडं ताभ्य एवाद्भ्यः पूर्ववत्पिंडं समुद्धृत्य
मूर्छयित्वानयद्दर्शितवान्ताः पुनर्गवाकृतिं दृष्ट्वाब्रुवन्न वै नोऽस्मदर्थमधिष्ठानमन्नमत्तुमयं पिंडोऽलं पर्याप्तं न यो
ग्य इत्यर्थः। गवि प्रत्याख्याने तथैवाश्वमानयत्ताभ्योऽब्रुवन्न वै नोऽयमलमिति पूर्ववत्ताः सर्वप्रत्याख्याने ताभ्यः पुरुषमा भ्येः
निर नयत्ताः स्वयोनिं पुरुषं दृष्ट्वाखिन्नाः सत्यः सुकृतं शोभनं कृतमधिष्ठानं बतेत्यब्रुवन्तस्मात् पुरुषो वाव पुरुष एव सुकृ
तं सर्वपुण्यकर्महेतुत्वात्स्वयं वा स्वेनैवात्मना स्वमायाभिः [illegible] कृतत्वात्सुकृतमुच्यते ताः देवता ईश्वरोऽब्रवीदिष्टमासामधि
ष्ठानमिति मत्वा सर्वे हि स्वयोनिषु रमंते तो यथायतनं [illegible] यद्वदनादिक्रियायोग्यमायतनं तत्प्रविशतेति तथास्त्वि
त्युक्तानुज्ञाप्रतिलभ्येश्वरस्य नगर्यामिव बलाधिकृतादयोऽग्निर्वाग्भूत्वा वाग्भूत्वा स्वयोनिं मुखं प्राविशत्तथोक्ता
र्थमन्यत् वायुर्नासिके आदित्यश्चक्षुषी दिशः कर्णौ ओषधिवनस्पतयस्त्वचं चंद्रमा हृदयं मृत्युर्नाभिमापः शिश्नं प्राविश
न्नेवं लब्धाधिष्ठानासु देवतासु ससर्जु निरधिष्ठाने स्तो अशनापिपासे ते ईश्वरमब्रूतामावाभ्यामधि
धिष्ठानमभिप्रजानीहि चिंतयं विधत्स्वेत्येवमुक्त ईश्वरस्ते अशनापिपासे अब्रवीत् न हि युवयोर्भावरूपत्वाच्चेत

५ चरंयागेषुदीयमानं पश्वरूपं पश्चरंतं इत्यादि।

३१

६ नवहुस्त्वनाच्छिसान्नादत्वं न संभवति तस्मादेतास्विवांच्याघास्कवायुर्वादेवतास्त्वध्यात्माधिदेवतास्वांभक्षामिवृत्तिसंविभागो

नानुग्रहाय तास्मानिनोऽयं देवस्यो योयो भागो हविरादिलक्षणो यस्याय स्मास्ते नैव भागेन भागिन्यो भागवत्यो वां

रोभीतिसह स्त्वादावीश्वर एवं व्यदधाद्यस्मात्तस्मादिदानीमपि यस्यै कस्यै चदेवतायै देवता... र्थीयं हविर्गृह्यते चरुपुरोडाशादिल ३३

क्षणं भागिन्यावेव भागवत्यावेवास्यां देवतायां भक्षानापिपासे भवतः स एवमीश्वर इति कथमिमे नु लोकाः लोकपालाश्च मया

सृष्टाः क्षुत्पिपासाभ्यां च संयोजितास्तो तेषां स्थितिरन्नमन्तरेण तस्मादन्नमेभ्यो लोकपालेभ्यः सृजा इत्येवं हि लोके ईश्वराणाम

नुग्रहे निग्रहे च स्वातंत्र्यं दृष्टं स्वेषु तदन्मे हश्वरस्यापि सर्वेश्वरत्वात्सर्वान्प्रति निग्रहा [illegible] नुग्रहे स्वातंत्र्यमेव सईश्वरोऽभ्य

तपत्तास एवमीक्षित्वा अपो हिरण्यागर्भतपस्ताभ्योऽभितप्ताभ्यो मूर्तिरजायत घनरूपधारणसमर्थं चराचरलक्षणमन्नं

यतो यदन्नमेव तन्मूर्तिरूपं यावै सान्नं हिरकाय ततदेतदन्नं लोकपालेभ्यः सृष्टं संक्षेप सृष्टं मूषकादि मार्जारादि

गोचरे सन्नमद्य त्परे आइहितिमत्वा पराङ् चतीति पराङ् सद्दरनतो लोकि बाह्मसदति गंतुमैच्छत्तत्र लायितुं प्रारभतेत्यर्थः तदन्ना

त्रिमत्वा स लोकपालसंघातः कार्यकरणलक्षणः पिंडः प्रथमजत्वादन्यानन्नादानपश्यंस्तदन्नं वाचा वदनव्यापारेणाजिघृ

क्षत् ग्रहीतुमैच्छत्तदन्नं नाशक्नोत्समर्थोऽभवद्वाचा वदनक्रियया ग्रहीतुमुपादातुं प्रथमजः शरीरी यद्ध वाग्रहीष्यत् ग्रहीतवान् स्यात् वन२११

सर्वोऽपि लोकस्तत्कार्यभूतत्वादन्नमभिव्याहृत्य हैवान्नमत्रप्स्यत् तृप्तोऽभविष्यन्न चैतदस्ति अतो नाशक्नोद्वाचा ग्रहीतुम् इ

त्यवगच्छामः पूर्वजोऽपि समानमुत्तरं तत्प्राणेन तच्चक्षुषा तच्छ्रोत्रेण त्वचा तन्मनसा तच्छिश्नेन तेन तेन करणव्यापारेणान्नं ६

ग्रहीतुमशक्नुवंस्त्यादपानेन वायुनाभ्यवहरणच्छिद्रेण तदन्नमजिघृक्षत्तदावयत् तदन्नमेवं जग्राह अशितवान् तेनैष योऽ

प्रायं ५ १ अन्नमत्तीत्यन्नादः ग्र२ ४सं ४ ननु यन्नायदिदा प्र सिद्धे एनदन्नं वा

१ अपानवायुः मुखच्छिद्रं मईमारः यद्वायुः

३२

पानवायुरन्नस्य ग्रहोऽन्नं गृह्णाति इत्येतद्यद्वायुर्योवायुरन्नायुरन्नबंधनो ऽन्नजीवनो वै प्रसिद्धः स एष यो वायुः स एव लो

कलोकपालसंघातस्थितिमन्ननिमित्तो लभ्यापुरपौरतस्याप्यविदस्थितिम [illegible] सतकथं न्वकेन प्रकारेणेति वितर्कयन्निति

दं नहत्तेर्माम् तरेणयदिदं कार्यकरणसंघातं वक्ष्यमाणं कथं न्वनुमाम् तरेण स्यात्परार्थं मध्यदिवा चाभिव्याहृतमित्या

दि केवलमेव वाग्व्याहरणादि तन्निरर्थकं न कथं च न नवेद्युलिस्कत्याद्दिपस्योरबंधादिन्नि:सयुक्ष्माणं स्वाम्यर्थं तस्वा

मिनमंतरेण सत्येवस्वामिनि तद्दृश्यमानमयापरेण स्वामिनाधिष्ठानत्त तात्तत्फलं साक्षिभूतेन भोक्तानप्रवितव्यं पुर

स्पैव राज्ञो यदि नामैतत्संहतकार्यस्य परार्थत्वं परमार्थिनं तंचितनमंतरेण न भवेत्पुरपौरकार्यमिवतत्स्वामिनमथकी

हं किं स्वरूपः कस्य वास्वामी यद्यहमंतरेण तत् कार्यकारणसंघातमनुप्रविश्यवागाद्यभिव्याहृताद्दिफलं नोपलभेयं राज्ञे

वपुरमविश्याधिकृतपुरुषावेक्षणं न कश्चिन्मा अयं सन्नेवं रूपश्चेत्यधिगच्छेत्त्विचारयेत् योयं वागाद्यभिव्याहृतादिफलमि

[illegible]

दमितिविदस्त ससंवेदनरूपश्चेत्यधिगंतव्योऽहं स्यां यदर्थमिदं संहतानां वागादीनामभिव्याहृतादि यथा स्तंभकुड्यादीनां प्रा

सादादि संहतानां स्वावयवैरसंहतपरार्थत्वं तद्वदित्येवमीक्षित्वा [illegible]

ततः कतरेण प्रपद्य इति मूर्ध्ना चास्य संघातस्य प्रवेशमार्गे विनपदकतरेण मार्गेणेदं कार्य [illegible] करणसंघातलक्षणं पुरं प्र

पद्य इत्येवमीक्षित्वा न तावन्ममास्य प्राणस्येव सर्वार्थाधिकृतस्य प्रवेशमार्गेण प्रपदाभ्यां प्रपद्ये किं तर्हि पारिशेष्याद्

कृ १ प्रपदाग्ररूपप्रवेशमार्गेण

७ स्य मूर्द्धानं विदार्य प्रपद्येयमिति लोकइवेक्षितकारीशः एतमेव मूर्द्धसीमानं केशविभागावसानं विदार्य छिद्रं कृत्वा एतया
द्वारा मार्गेण इमं कार्यकरणसंघातं प्रापद्यत प्रविवेश ॥ इयं हि प्रसिद्धा मूर्द्धनि तैलादिधारणकाले अंतस्तद्रसादि
संवेदनात् सैषा विदृति विदारितत्वाद्विदृतिर्नाम प्रसिद्धा द्वारं । इतराणि तु श्रोत्रादिद्वाराणि रसादिस्थानी
यसाधारणमार्गत्वान्न समृद्धिनंदनहेतूनि । इदं तु द्वारं परमेश्वरस्यैव केवलस्येति तदेतन्नांदनं नंदनमेव नां
दनमिति परोक्षेण नंदंत्यनेन द्वारेण गत्वा स्मिन् ब्रह्मणीति तस्यैवं स्रष्टुः प्रविष्टस्य जीवेनात्मना राज्ञ इव
३ पुरं त्रय आवसथाः जाग्रत्काले इंद्रियस्थानं दक्षिणं चक्षुः स्वप्नकाले अंतर्मनः सुषुप्तिकाले हृदयाकाशमित्येते
त्रयाणां वा त्रय आवसथाः पितृशरीरं मातृगर्भाशयः स्वं च शरीरमिति त्रयः स्वप्नाः जाग्रत्स्वप्नसुषुप्त्याख्याः ननु जा
गरितं प्रबोधमयत्वान्न स्वप्नो नैवं स्वप्न एवं कथं परमार्थस्वात्मप्रबोधाभावात् स्वप्नवदसद्वस्तुदर्शनाच्च ॥
[illegible]
[illegible]
[illegible]
लोकपालान् [illegible] एवं पंच [illegible]
[illegible] १

१ स जातः पुरुषः भूतानि देहादिसंघातमेवात्मानं अभिव्यैख्यत् किं वा अथवा इह संघाते अन्यं संघादन्यमात्मानं वदिष्यत् किं इति त्र
एवं प्रश्नोत्तरे ॥
कथयति ६१
अनंतर्हितः

अयमावसथः चक्षुर्दक्षिणं प्रथमं मनसो तु हृदि तायो हृदयाकाशस्तृतीयोयमावसथ इत्यनुकीर्त्तनमेव
ते त्वावसथेषु पर्यायेणात्मभावेन वर्त्तमानो विद्यया दीर्घकालं गाढं प्रसुप्तः स्वाभाविक्या न प्रबुध्यते नेकशत
सहस्रानर्थसन्निपातजदुःखमुद्गराभिघातानुभवैरपि सकदाचित् परमकारुणिकेनाचार्येणात्मज्ञानप्रबोध
लब्ध [illegible] कार्यो वेदांतमहाभेर्यां कर्णमूले ताड्यमानायां मेतमेव स्रष्ट्रादिकर्तृत्वेन प्रकृतं पुरुषं पुरिश
स त यमात्मानं ब्रह्म बृहत्ततमं तकारेणैकेन लुप्तेन ततमं व्याप्ततमं पश्यदाकाशवद्व्याप्तम् अपश्यत् कथमिदं
ब्रह्म ममात्मनः स्वरूपमदर्शं दिष्ट्या [illegible] वानस्मि अहो इति विचारयन् पूर्वं यस्मादिदं मित्येवं यस्मात् परोक्षा
२ दं ब्रह्म सर्वांतरमपश्यद् परोक्षेण तस्मादिदं पश्यतीति इदंद्रो नाम परमात्मा इदंद्रोह वै नाम प्रसिद्धो लोके ईश्वरस्त
मेवमिदंद्रं संतमिंद्र इति । परोक्षाभिधानेनाचक्षते ब्रह्मविदः संव्यवहारार्थं पूज्यतमत्वात् प्रत्यक्षनामग्रहणभ
यात् तथापि परोक्षप्रियाः परोक्षनामग्रहणप्रिया इव एव हि यस्मादेवाः किमु सर्वदेवानामपि देवो महेश्वरो द्विर्वच
सेना नं अध्यायपरिसमाप्त्यर्थं अस्मिन्नध्याये एषवाक्यार्थः जगदुत्पत्तिस्थितिलयलक्षणं संसारी सर्वशक्तिः स
र्ववित् सर्वमिदं जगत्स्वतोन्यद्वस्त्वंतरमनुपादायैवाकाशादिक्रमेण सृष्ट्वा स्वात्मप्रबोधनार्थं सर्वाणि च प्राणिदेह
शरीराणि स्वयं प्रविवेश प्रविश्य च स्वमात्मानं यथाभूतमिदं ब्रह्मास्मीति साक्षात्प्रबुध्यत तस्मात् स एव सर्वशरी
इति ऐतरेयोपनिषदि तृतीयोध्यायः ॥ इदमिति ह्यनिर्माला ताडबनानि सर्वे
इति [illegible]

८ रेष्वेक एवात्मा नान्य इत्यतोपि सैन आत्मा ब्रह्मास्मीत्येवं विद्यादित्यात्मा वा इदमेक एवाग्र आसीदुक्तत्वं नेमितिचो
क्तमन्यत्रैः सर्वात्मनो वालाग्रमात्रमपि च प्रविष्टं नास्तीति कथं सीमानं विदार्य प्रापद्यत पिपीलिकेव सुषिरं नन्व
त्यल्पमिदं चोद्यं बह्वत्र चोदयितव्यम् अकरणः सन्नीक्षतानुपादाय किंचिल्लोकानसृजत्पद्भ्यः पुरुषं समु
द्धृत्यामूर्छयत्तस्यान्निध्यानमुखादिनिर्भिन्नं मुखादिभ्यश्चाग्न्यादयो लोकपाला इति वाशनायादिसंयोजनं तो ना०
दायतनप्रार्थनं तदर्थं गवादिप्रदर्शनं तेषां यथायतनप्रवेशनं सृष्टस्यान्नस्य पलायनं वागादिभिस्तज्जिघृक्षा इति
न सर्वं सीमाविदारणेन प्रवेशनमिति वास्तु एतदपि सर्वमेवेदमनुपपन्नम् आत्मावबोधमात्रस्य विवक्षितत्वात्सर्वो यम
वाद इत्यदोषः। मायावी वा महामायावी देवः सर्वज्ञः सर्वशक्तिः सर्वमेतच्चकार सुखावबोधप्रतिपत्त्यर्थं लोकवदा
ख्यायिकादिप्रपंच इति युक्ततरः पक्षः। नहि सृष्ट्याख्यायिकादिपरिज्ञानात्किंचित्फलमिष्यते। ऐकात्म्यस्वरूपपरि
ज्ञानादमृतत्वं फलं सर्वोपनिषत्प्रसिद्धं स्मृतिषु च गीताद्यासु समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमित्यादि। ननु
त्रय आत्मानो भोक्ता कर्ता संसारी जीव एकः सर्वलोकशास्त्रप्रसिद्धोऽनेकप्राणिकर्मफलोपभोगयोग्यानेकाधिष्ठान
चतुर्दशलोकदेहनिर्माणेन लिंगेन यथाशास्त्रप्रकाशितेन पुरप्रासादादिनिर्माणलिंगेन तद्विषयकौशल
ज्ञानवानीश्वरः कर्ता तद्वदादिरीश्वरः सर्वज्ञो जगतः कर्ता द्वितीयश्चेतन आत्मावगम्यते वाचो निवर्तंते नेति नेति

त्यादिशास्त्रप्रसिद्ध औपनिषदः पुरुषस्तृतीयः एवमेते त्रय आत्मानोऽन्योन्यविलक्षणास्तत्र कथमेक एवात्माद्वि
तीयोऽसंसारीति ज्ञातुं शक्यते तत्र जीव एव तावत्कथं ज्ञायते नन्वेवं ज्ञायते श्रोता मंता द्रष्टाऽऽदेष्टा घोष्टा विज्ञाता
विज्ञातेति ननु विप्रसिद्धं ज्ञायते च श्रवणादिकर्तृत्वेनातो विज्ञातेति च तथा न दृष्टे द्रष्टारं न मते मंतारं मन्वीथा न विज्ञाते विज्ञा
तारं विजानीया इत्यादि च सत्यं विप्रतिषिद्धं यदि प्रत्यक्षेण ज्ञायते सुखादिवत्प्रत्यक्षज्ञानं च यदि निवार्यते न मतेर्मंतारं म
न्वीथा इत्यादिना ज्ञायते तु श्रवणादिलिंगेन तत्र कुतो विप्रतिषेधः। ननु श्रवणादिलिंगेनापि कथं ज्ञायते यावता यदा श्रु
णोत्यात्मा श्रोतव्यं तदा तस्य श्रवणक्रियायामेव वर्तमानत्वान्मनन विज्ञानक्रियेन संभवतस्तथात्मनि पर त्र वा तथान्य
त्रापि मननादिक्रियासु श्रवणादिक्रियाश्च स्वविषय एव वर्तंते मंतव्यादन्यत्र मंतुर्मननक्रिया संभवति नन्वनसा
सर्वमेव मंतव्यं सत्यमेवं तथापि सर्वमपि मंतव्यं मंतारमंतरेण न मंतुं शक्यं यद्येवं किमत्र स्यादिदमत्र स्यात् सर्वस्य यो
मंता स मंतैवेति न मंतव्यः स्यान्न च द्वितीयो मंतुर्मंतास्ति यदा तमेव मंतव्यं कल्पयेन्न मंतव्य आत्मनो यश्च मंतव्य आत्मा
तौ द्वौ प्रसज्येयातामेक एव तावदात्मा द्विधा मंतृमंतव्यत्वेन विशकलीभवेद्वंशादिवदुभयथाप्यनुपपत्तिरेव यथा प्र
दीपस्य प्रकाशप्रकाशकत्वानुपपत्तिः समत्वात्तद्वच्च मंतुर्मंतव्ये मनव्यापारस्तु तुल्यः कालोऽस्यात्मन न मननार्थं यदा
पि लिंगेनात्मानं मनुते मंता तदापि पूर्ववदेव लिंगेन मंतव्य आत्मा यश्च तस्य मंता तौ द्वौ प्रसज्येयातामेक एव वा द्वि क्ता
धेति पूर्वोक्तो दोषः। न प्रत्यक्षेण नाप्यनुमानेन विज्ञायते चेत्कथमुच्यते स मन आत्मेति विद्यादिति कथं वा श्रोता
ऽनुमानेनेत्यर्थः।

१ सिद्धांती ५ आग्रदेशेव। २ सिद्धांती ३ वादी १ पूर्ववादी
३ यदा श्रोता तदा न मंता यदा मंता तदा न श्रोता। ४ वादी

९ मंता इत्यादि तत्र श्रोतृत्वादि धर्म्मवानात्मा श्रोतृमंतृत्वादि प्रसिद्धमात्मनः किमत्र विषमं पश्यसि यद्यपि तव न विष
मं मम तु विषमं प्रतिभाति कथं यदासौ श्रोता तदा न मंता यदा मंता तदा न श्रोता तत्रैवं सति पक्षेन श्रोता नापि मंता
तथान्यत्रापि यद्येवं तदा श्रोतृत्वादि धर्म्मवानात्मा श्रोतृत्वादि धर्म्मवान्वा … वेति संशयस्थाने कथं तव न वैशम्यं
यदा देवदत्तो गच्छति तदा न स्थाता गतेर्वय दा तिष्ठति तदा न गंता स्थाता … दास्य पक्ष एव गंतृत्वं स्थातृत्वं च न नित्य
गंतृत्वं स्थातृत्वं वा तद्वत्तात्रत्र कारणादयः पश्यति पक्षप्राप्ते नैव श्रोतृत्वादिना नोच्यते श्रोता मंतेत्यादि संयोगकृत्वा
मयोगपद्यत्वं तु ज्ञानस्याचक्षुते दर्शयति चान्यत्र मना अभूवं नादर्शमित्यादि युगपज्ज्ञानानुपपत्तिर्मनसो लिंगम्
इति च … यं भवत्वेवं किं तव नेष्टं यद्येवं स्यादस्त्वेव तवेष्टं चेत्तु तर्ह्यस्य न संभवति किं न श्रोता मंतेत्यादि श्रुत्यर्थानि सिद्धांती
श्रोता मंतेत्यादि वचनानुपाधिकत्वेन प्रत्यक्षत्वयानं नित्यमेव श्रोतृत्वाद्यभ्युपगमान्नहि … श्रोतुः श्रुतेर्विप
रिलोपो विद्यते इत्यादिश्रुतेरेवं तर्हि नित्यश्रोतृत्वाद्यभ्युपगमे प्रत्यक्षविरुद्धायुगपज्ज्ञानोत्पत्तिरज्ञानाभावश्चा
त्मनः स्वतः कृत्स्न इति स्यात्तच्चानिष्टमिति न उभयदोषानुपपत्तेरात्मनः श्रुत्यादि श्रोतृत्वादिधर्मवत्त्व श्रुतेरनि
त्यानां मूर्त्तानां चक्षुरादीनां दृष्ट्याद्यनित्यमेव संयोगवियोगधर्म्मिणां यथाग्नेर्ज्वलनं दहनादि संयोगजत्वात्तद्व
न्न तु नित्यस्यामूर्त्तस्यासंयोगवियोगधर्म्मिणः संयोगजदृष्ट्याद्यनित्यधर्म्मवत्त्वं संभवति तथा च श्रुतिर्न हि द्रष्टु २
र्दृष्टेर्विपरिलोपो विद्यत इत्यादि एवं तर्हि द्वे दृष्टी चक्षुषोनित्या दृष्टिर्नित्यात्मनस्तथा च द्वे श्रुती श्रोत्रस्यानित्या

२ सिद्धांतिवचनां यमानसा श्रोता
मंतेत्यादि भवतु किं तव नेष्टं।

४ बधिरस्य भावो बाधिर्यं आगतं प्राप्तं
बाधिर्यं यस्य स आगतबाधिर्यः।४

नित्यात्मनस्तथा मतिविज्ञाती बाह्या बाह्येति चेत्ताद्य … वेति उपपन्नं भवति दृष्टेर्द्रष्टा श्रुतेः श्रोतेत्येवमा
द्या लोकेपि प्रसिद्धं चक्षुषः तिमिरागमापाययोर्नष्टा दृष्टिर्जाता दृष्टिरिति चक्षुर्दृष्टेरनित्यत्वं तथा च श्रुतिम
त्यादीनां नात्मदृष्ट्यादीनां च नित्यत्वं प्रसिद्धमेव लोके वदति ह्युद्धृत चक्षुः स्वप्नेद्य मया भ्राता दृष्ट इति तथा
गतबाधिर्यः स्वप्नेश्रुतो मंत्रो … द्य इत्यादि यदि हि चक्षुःसंयोगजैवात्मनो नित्या दृष्टिस्तन्नाशेन श्येत्तदा उद्धृतचक्षु
षः स्वप्ने नीलपीतादिकं न पश्येन्नहि दृष्टुर्दृष्टेरित्याद्या च श्रुतिरनुपपन्ना स्यात्तच्च दृष्टुः पुरुषाय नस्वप्ने
पश्यतीत्याद्या च नित्यात्मनो दृष्टिर्बाह्यानित्यदृष्टेर्ग्राहिका बाह्यदृष्टेश्चोपजनापायानित्यधर्म्मवत्त्वात् ग्राहिकाया
आत्मदृष्टेस्तद्वदवभासत्वमनित्यत्वादि भ्रांति निमित्तं लोकस्येति युक्तं यथा भ्रमणादिधर्म्मवदलातादि वस्तु वि
षयया दृष्टिरपि भ्रमतीव तद्वत्तथा च श्रुतिर्ध्यायतीव लेलायतीवेति तस्मादात्मदृष्टेर्नित्यत्वान्नयोगपद्यमयौ
गपद्यं वास्ति बाह्यानित्यदृष्टिरूपाधिवशात्तु लोकस्य च तार्किकाणां चागमसंप्रदायवर्जितत्वाद नित्यात्मनो
दृष्टिरिति भ्रांतिरुपपन्नैवं जीवेश्वरपरमात्मकल्पना चैतन्निमित्तैवं तथास्ति नास्ति अस्ति नास्तीत्याद्याश्च या
वंतो वाङ्मनसयोर्भेदाय त्रैकं भवंति तद्विषयादृष्टेर्निर्विशेषायाः अस्ति नास्त्यस्ति नास्त्येकं नानागुणवद
गुणं जानाति न जानाति क्रियावदक्रियं फलवदफलं च सबीजं निर्बीजं सुखं दुःखं न ध्यं न मध्यं शून्यमस्य

३ उपाधिनिमित्तैवेत्यर्थः।
२ थानित्याया

१ अहं इति स्फुरणाख्यविचारणयोः साक्षादित्यर्थः।

१० न्यं परोहमस्मीति वा सर्ववाक्प्रत्ययागोचरे स्वरूपे योऽभिकल्पयितुमिच्छति स नूनं खमपि चर्मवद्वेष्टयितुमि
च्छति सोपानमिव च पद्भ्यामारोढुं जले खे च मीनानां वयसां च पदं दिदृक्षते नेति नेति यतो वाचो निवर्तन्ते
इत्यादिश्रुतिभ्यः को अद्धा वेदेति मन्त्रवर्णात् कथं तर्हि तस्याहमस्मीति वेदनं ब्रूहि केन प्रकारेण तमहमस्म
ीति विद्याम् अत्राख्यायिकामाचक्षते कश्चित्किल मनुष्योऽमुग्धः कश्चिदुक्तः कस्मिंश्चिदपराधे धिक्कृत्वा त्वं नासि
नातु ४ मनुष्य इति स मुग्धतयात्मनः प्रत्ययितुं कंचिदुपेत्याह ब्रवीतु भवान् कोऽहमस्मीति स तस्य मुग्धतां ज्ञात्वा क्रमेण दृं
बोधयिष्यामीति स्थावराद्यात्मभावमपोह्य न त्वममनुष्य इत्युक्त्वोपरराम स तं मुग्धः प्रत्याह भवान्मां बोधयि
तुं प्रवृत्तस्तूष्णीं बभूव न किं बोधयसीति तादृगेव तद्भवतो वचनं नास्यमनुष्य इत्युक्ते मनुष्यत्वमात्मनो
न प्रतिपद्यते यः स कथं मनुष्योऽसीत्युक्तेऽपि मनुष्यत्वमात्मनः प्रतिपद्यते तस्माद्यथाशास्त्रोपदेश एवात्माव
बोधविधिर्नान्यः न ह्यग्नेर्दाह्यं तृणाद्यन्येन केनचिद्दग्धुं शक्यम् अत एव शास्त्रमात्मस्वरूपं बोधयितुं प्रवृत्तं स
दमनुष्यत्वप्रतिषेधेनैव नेति नेत्युक्त्वोपरराम तथानन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनमि
त्वमसि यत्र त्वस्य सर्वमात्मैवाभूदित्येवमाद्यपि यावदयमेवं यथोक्तमिममात्मानं न वेत्ति तावद
यं बाह्यानित्यदृष्टिलक्षणमुपाधिमात्मत्वेनोपेत्याविद्योपाधिधर्मानात्मनो ब्रह्मादिस्तम्बपर्यन्तेषु स्था १०

३ अतोऽविलोपाधिवृत्तिविधेः मतियोऽवशिष्टेनिरूपा २ शास्त्रे भेदज्ञानं निषेधति। १ देवतिर्यङ्निरये
धिः समेत्यात्मेति विद्यात्।।३ १ मन्यमानो

---

२ कामावस्थानिर्वर्तते इति
१ आत्मरूपं

नेषु पुनःपुनरावर्तमानोऽविद्याकामकर्मवशात् संसरति स एवं संसरन्नुपात्तदेहेन्द्रियसंघातं त्यजति त्यक्त्वान्यमुपादत्ते
पुनःपुनरेवमेव नदीस्रोतोवज्जन्ममरणप्रबन्धाविच्छेदेन वर्तमानः एतमर्थं दर्शयन्त्याह श्रुतिर्वैराग्यहेतोरय
मेव विद्याकामकर्मवान्यस्मादिकर्मफलत्वात् अस्माल्लोकाद्धूमादिक्रमेण चन्द्रमसं प्राप्य क्षीणकर्मा वृष्ट्यादिक्रमेण
मं लोकं प्राप्यान्नभूतः सन्पुरुषाग्नौ हुतस्तस्मिन्पुरुषे ह वा अयं संसारी रसादिक्रमेण आदितः प्रथमं रेतोरूपेण गर्भो
भवतीत्येतदाह यदेतत्पुरुषे रेतः स्तेन रूपेणेति तदेतदन्नम यस्य पिण्डस्य सर्वेभ्यो अङ्गेभ्योऽवयवेभ्यो रसा
दिलक्षणेभ्यस्तेजः सारस्वरूपं शरीरस्य संभूतं परिनिष्पन्नं तत्पुरुषस्यात्मभूतत्वादात्मानं रेतोरूपेण गर्भीभूतं आत्मनि गच्छति
मात्मन्येव स्वशरीरे बिभर्ति धारयति तद्रेतो यदा यस्मिन्काले भार्यामृतुमती तस्यां योषाग्नौ स्त्रियां सिंचत्युप
नदा ९ गच्छन् तदथ तदेतत् आत्मनो जन्म तं जनयति पिता तदस्य पुरुषस्य स्थानान्निर्गमनं रेतःसेककाले रेतोरूपेणास्य
संसारिणः प्रथमं जन्म प्रथमावस्थाभिव्यक्तिः तदेतदुक्तं पुरस्तादसौ वा आत्मा मुमाऽमानमित्यादिना तदेतद्यदा स्त्रि
यां सिक्तं तस्या आत्मभूयमात्माव्यतिरेकतां यथा पितुरेवं गच्छति प्राप्नोति यथा स्वमङ्गं स्तनादि तथा तद्वदेव तस्मा
द्धेतोरेनां मातरं स गर्भो न हिनस्ति पीलकादिव्याधिवत् यस्मात्स्तनादिस्वाङ्गवदात्मभूयं गतं तस्मान्न हिनस्ति न बाधत इ
त्यर्थः सा तदेतं गर्भमस्य भर्तुरात्मानं ममात्रागतं उदरे प्रविष्टं गतं बुद्ध्वा भावयति परिपालयति परिहार्यविरुद्धाश
नादिपरिहारमनुकूलाशनाद्युपयोगं च कुर्वती सा भावयित्री वर्धयित्री भर्तुरात्मनो गर्भभूतस्य भावयितव्या रक्ष
यितव्या भवति न ह्युपकारप्रत्युपकारमन्तरेण लोके कस्यचित्केनचित्संबन्ध उपपद्यते तं गर्भं स्त्री यथोक्तेन गर्भधा

१ प्रसु २ आत्मनो भर्तुः। ३ वर्धयन्ति

ऐतरेय भा०

३ तदात्मानमेव भावयति … मेव … १ अग्रे

११ रणविधानेन बिभर्त्ति धारयति प्राक् जन्मनः स पिता अग्रे एव पूर्वं जातमात्रं जन्मनः अर्ध्वं पूर्वजन्मनो जातं कुमा
रं जातकर्मादिना [illegible] भावयति स पिता यद्यस्मात्कुमारं जन्मनोऽध्यूर्ध्वं अग्रे जातमात्रमेव जातकर्मादिनाय भावय
ति पितुरात्मैव हि पुत्रेणात्मायते अथ यो किंपतिर्जायां प्रविशतीत्यादितः किमर्थमात्मानं पुत्ररूपेण जनयित्वा भावयतीत्यु
च्यते एषां लोकानां संतत्यै अविच्छेदाय इत्यर्थः विच्छिद्येरन् हि मे लोकाः पुत्रोत्पादनादिनं कुर्युः केचन एवं पुत्रोत्पादनादि यदि४
कर्माविच्छेदेनैव संततास्प्रबंधरूपेण वर्त्तन्ते हि यस्मादिमे लोकास्तस्मात्तदविच्छेदाय तत्कर्त्तव्यं न मिथ्यात्वमित्यर्थः तदस्य
संसारिणः कुमाररूपेण मातुरुदराद्यन्निर्गमनं तद् द्वितीयं जन्म द्वितीयावस्थाभिव्यक्तिरस्यापि पुनः सोऽयं
५ पुत्रात्मा पुण्येभ्यः शास्त्रोक्तेभ्यः कर्मभ्यः कर्मनिष्पादनार्थं प्रतिधीयते पितुः स्थाने पित्राय कर्त्तव्यं तत्करणाय प्रति धी
यत इत्यर्थः तथा च संपत्तिविद्यायां वाजसनेयके पित्रानु शिष्टोऽहं ब्रह्माऽहमित्यादि प्रतिपद्यत इत्यथानंतरं पुत्रे निवे
श्य [illegible] तस्मिन्नारम्भस्य पुत्रस्य [illegible] तथायं पित्रात्मा कृतकृत्यः कर्त्तव्यात् ऋणत्रयाद्विमुक्तः कृतकर्त्तव्यः सन्वियोगतो गत
वयाः जीर्णः सन्प्रैति म्रियते स इतोऽस्मात्प्रयन्नेव शरीरं परित्यजन्नेव तृणजलौकावद्देहांतरमुपाददत् कर्मजितं पुनर्जायते
तदस्य मृत्वा [illegible] प्रतिपत्तव्यं यत् तृतीयं जन्म ननु संसरतः पितुः सकाशाद्रेतोरूपेण प्रथमं जन्म तस्यैव कुमाररूपे
मातु णार्द्द्वितीयं जन्मोक्तं तस्यैव वक्तव्ये तृतीये जन्मनि वक्तव्ये [illegible] प्रेतस्य पितुर्यज्जन्म तत्तृतीयमिति कथमुच्यते नैष दोषः ११
पितापुत्रयोरेकात्मत्वस्य विवक्षितत्वात् सोऽपि पुत्रः स्वपुत्रे भार्यां निधाय ततः प्रयन्नेव पुनर्जायते यथासौ पिता तद्वदितर
त्रोक्तमितरत्राप्युक्तमेव भवतीति मन्यते श्रुतिः पितापुत्रयोरेकात्मत्वादेवं संसरन् [illegible] न्नवस्थाव्यक्तित्रयेण जन्ममरण

४ मातुरुदरशयनं। ५ प्रतिपद्यत इत्यर्थः

३ सन्नेव जन्मानि [illegible] कयामास। १ एतत्स्वोक्तिवचनं एवं उक्तप्रकारेण उवाच। ५ सामर्थ्याधिक्यात्सर्वेषां पक्षिणामधः कर्मश्येन इव। क

प्रबंधारूढः सर्वोऽपि लोकः संसारस[illegible]मुद्रे निपतितः कथंचिद्यथा श्रुतं कमात्मानं विजानाति यस्यां कस्यांचिदवस्था
यां तदैव मुक्तः सर्वसंसारबंधनैः कृतकृत्यो भवतीति तदुक्तं ऋषिणा मंत्रेणाप्युक्तमित्याह गर्भे मातुर्गर्भाशय एव
सन्नु इति वितर्के अनेकजन्मांतरभावनापरिपाकवशाद्देवानां वागादीनां जनिमानि जन्मानि विश्वा[illegible] स
र्वाणि अन्ववेदमहमहोऽन्वबुद्धवानस्मीत्यर्थः शतमनेकं [illegible] मा मा पुर आयसीरायस्यो लोहमय्य इव अभेद्यानि श
ऋ रीराणि इत्यभिप्रायः अरक्षन्रक्षितवत्यः संसारनिर्गमनाद् [illegible] अधः श्येन इव जालं भित्वा जवसा आत्मज्ञानसामर्थ्येन नि
रदीयं निर्गतोऽस्मि अहो गर्भ एव शयानो वामदेव ऋषिरेवमुवाचैतत् स वामदेव ऋषिर्यथोक्तमात्मानमेवं विद्वान्सन्न
स्मात् शरीरस्याविद्यापरिकल्पितस्यायसवददृश्यस्य जनमरणाद्यनेकानर्थशताविष्टशरीरप्रबंधस्य परमात्म
ज्ञानामृतोपयोगजनितवीर्यकृतभेदात् शरीरोत्पत्तिबीजाविद्यादिनिमित्तोपमर्द्दहेतोः शरीरविनाशादित्यर्थः ऊर्ध्वः अनंतर
परमात्मभूतः सन्नधोभावात् संसारात् ऊर्ध्वं ज्ञानावद्योतितामलसर्वात्मभावमापन्नः सन्नमुष्मिन्यथोक्ते अजरे
अमये अमृते अनपरे अनंतरे अबाह्ये प्रज्ञानामृतैकरसे स्वर्गे लोके स्वस्मिन्नात्मनि स्वस्वरूपे अमृतः समभवत् आत्मज्ञानी
न प्राप्यैवा आत्मकामतया जीवन्नेव सर्वान्कामानाप्त्वेत्यर्थः द्विर्वचनं सफलस्य सोदाहरणस्यात्मज्ञानस्य परिसमाप्त्य
र्थं ब्रह्मविद्यासाधनकृतसर्वात्मभावफलप्राप्तिं वामदेवाद्याचार्यपरंपरया श्रुत्या वद्योत्यमानां ब्रह्मवित्परिषद्यत्यं
तप्रसिद्धामुपलभमाना मुमुक्षवो ब्राह्मणा अधुनातना ब्रह्मजिज्ञासवोऽनित्यसाध्यसाधनलक्षणात्संसाराद्वि
जीव। रक्ताः जीवंतो भावाद्वा [illegible] विचारयंतोऽन्योन्यं पृच्छन्ति [illegible] तिकोयमात्मेति

१ इतिरेतरेयोपनिषदि चतुर्थोऽध्यायः। इति … १ परं … ५ देहपातादूर्ध्वं विदेहमुक्तः सन्नभवत्
जीवदवस्थायामेव शरीरात्माभिमानराहित्येन शरीरविनाशादित्यर्थः।

ऐतरेयी आ० १कः स आत्मेतियं वात्मानमयमात्मेति साक्षादुपासीनो २इंद्रियरूपं ब्रह्म। ना६
वामदेवोऽमृतः समभवत्तमेव वयमप्युपास्महे। ४स

१२ ति कथं । यमात्मानमयमात्मेति साक्षाद्वयमुपास्महे कोन्नु खलु स आत्मेत्येवं जिज्ञासापूर्वमन्योन्यं पृष्टवंतो म
तिक्रांतविशेषविषयाःकृतिसंस्कारजनिता स्मृतिरजायत तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं स एतमेव सीमानं वि
सत० दार्यैतया द्वारा प्रापद्यत तमेव पुरुषं द्वि ब्रह्मणी इतरेतरप्रातिकूल्येन प्रतिपन्ने इति ते चास्य पिंडस्यात्मभूते तयो
रन्यतरस्यात्मोपास्यो भवितुमर्हति यो वाऽयमुपास्यः कतरोन्वात्मेति विशेषनिर्धारणार्थं पुनरन्योन्यं पप्रच्छुर्विचारयं
तः पुनस्तेषां विचारयतां विशेषविचारणास्पदविषया मतिरभूत् कथं द्वे वस्तुनी अस्मिन्पिंडे उपलभ्येते अनेकभेद
भिन्नेन करणेन येनोपलभते यश्चैक उपलभते करणांतरोपलब्धविषयस्मृतिप्रतिसंधानात्तत्र तावद्येनोपलभ्य
ते स आत्मा भवितुमर्हति केन पुनरुपलभ्यते इत्युच्यते येन वा पश्यति चक्षुषा रूपं पश्यति येन वा शृणोति श्रोत्रेण शब्दं
येन वा घ्राणेन गंधानाजिघ्रति येन वा वाक्करणभूतेन वाचं नामात्मिकां व्याकरोति गौरश्व इत्येवमाद्यां साध्व
साध्विति येन वा जिह्वाभूतेन स्वादु चास्वादु च विजानाति किं पुनस्तदेकमनेकधा भिन्नं करणमित्युच्यते यदुक्तं पुर
हृदयं स्तात्प्रजानां रेतो हृदयस्य रेतो मनो मनसा सृष्टा आपश्च वरुणश्च हृदयान्मनो मनसश्चंद्रमा इति तदेवैतद्धृदयं म
१ने नश्चैकमेवैतत्तदनेकधा एते नांतःकरणेन चक्षुर्भूतेन रूपं पश्यति श्रोत्रभूतेन शृणोति घ्राणभूतेन जिघ्रति
वाग्भूतेन वदति जिह्वाभूतेन रसयति स्वेनैव विकल्पनारूपेण मनसा संकल्पयति हृदयरूपेणाध्यवस्यति तस्मा १२
त्सर्वकरणविषयव्यापकमेकमिदं करणं सर्वोपलब्ध्यर्थमुपलब्धुस्तथा च कौषीतकिनां प्रज्ञया वाचं समारुह्य वाचा
सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोतीत्यादि वाजसनेयके च मनसा ह्येव पश्यति
५रेतः कार्यं हृदयं अंतःकरणं। वि२ ३निश्चयात्मकबुद्धिरूपेण

इत्येकं इंद्रियपंचकं ... [illegible]

५श्रोत्रं स्मरणं तेऽत्मा ब्रह्म उपास्यो भवितुमर्हति। १साधकत्वं। ५अरे शास्त्रीयज्ञानं।

मनसा ह्येव शृणोति हृदयेन हि रूपाणि जानातीत्यादि ॥ तस्माद्धृदयमनोवाच्यस्य सर्वोपलब्धिकरणत्वं प्रसिद्धं ॥ तदात्मकश्च प्राणः ॥
यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति हि ब्राह्मणं ॥ करणसंहतिरूपत्वं प्राणस्य इत्यवोचाम प्राणसंवादादौ ॥ तस्माद्यन्मुपदार्थो
प्रापद्यत ब्रह्म तं तदुपलब्धुरुपलब्धिकरणत्वेन गुणभूतत्वान्नैव ब्रह्मोपास्य आत्मा भवितुमर्हति ॥ पारिशेष्याद्यस्योपलब्धुरुपल स३
ब्ध्यर्थाः परस्य हृदयमनोरूपस्य करणस्य वृत्तयः ताः ॥ उपलब्ध्यर्थायाऽन्तःकरणस्य वृत्तयो बाह्यांतर्विषयविषया इमा
उच्यंते ॥ संज्ञानं संज्ञप्तिश्चेतनाभावः ॥ आज्ञानमाज्ञप्तिरीश्वरभावः ॥ विज्ञानं कलादिपरिज्ञानं ॥ प्रज्ञानं प्रज्ञप्तिः प्रज्ञा
मेधा ग्रंथधारणसामर्थ्यं दृष्टिरिंद्रियद्वारा सर्वविषयोपलब्धिः ॥ धृतिर्धारणमवसन्नानां शरीरेंद्रियाणां ययोत्तंभनं
भवति धृत्या शरीरमुद्वहतीति हि वदंति ॥ मतिर्मननं ॥ मनीषा तत्र स्वातंत्र्यं ॥ जूतिश्चेतसोऽनुजो विंवादुःखित्वेन दुःखिता
भावः ॥ स्मृतिः स्मरणं ॥ संकल्पः शुक्लकृष्णादिभावेन संकल्पनं रूपादीनां ॥ क्रतुरध्यवसायः ॥ असुः प्राणादिजीवनक्रि
यानिमित्ता वृत्तिः ॥ कामोऽसंनिहितविषयाकांक्षा तृष्णा ॥ वशः स्त्रीव्यतिकराद्यभिलाषः ॥ इत्येवमाद्या अंतःकरणवृत्त
यः उपलब्धृरूपत्वात्प्रज्ञानरूपस्य ब्रह्मण उपाधिभूताः तदुपाधिजनितगुणनामधेयानि संज्ञानादीनि सर्वाण्येवैता अंतःकरणस्य
नि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवंति ॥ न स्वतः साक्षात् तथा चोक्तं ॥ प्राणन्नेव प्राणो नाम भवति ॥ स एष
प्रज्ञानरूप आत्मा ब्रह्मापरं सर्वशरीरेषु प्राणः प्रज्ञात्मांतःकरणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिंबवत्
हिरण्यगर्भः प्राणः प्रज्ञात्मा ॥ एष एव इंद्रो गुणाद्देवराजो वा ॥ एष प्रजापतिर्यः प्रथमजः शरीरी ॥ एते सर्वे देवाः ॥ इमानि च पं
च पृथिव्यादीनि महाभूतानि अन्नान्नादत्वलक्षणान्येतानि च क्षुद्रैरश्यकैर्मिश्राणि क्षुद्रमिश्राणि इव शब्दोऽनर्थकः ॥ सर्वाणीनि
२प्रज्ञाः परपर्यायप्रज्ञाः विशेषोपाधिः स्मृ १किं चेमानि १विराडित्यर्थः १सर्वेषां माटीनि
प्रज्ञात्मा ईश्वरसंज्ञक इत्यर्थः। १पंचव्योममहान्तोऽनन्ते भूतानां अन्नमन्नादश्च प्राणिनो जायंते इत्यादि अन्नान्नादलक्षणानीति।

१कार्याणीत्यर्थः। २स्थावरजंगमभेदेन निर्दिश्यमानानि कारणानि कार्याणि च सत्यतावानेत्यर्थः।
→मनाऽविद्या ७सर्वसाधारणस्य सप्तजगद्बीजस्य प्रवर्तकमायायाः प्रवर्तकमित्यर्थः।

एतरेयो॰ १३ बीजानि कारणानीतराणि चेतराणि चेद्वैराश्येन निर्दिश्यमानानि। कानि तानीत्युच्यते। अंडजानि पक्ष्यादीनि। जारुजानि च।
जरायुजानि मनुष्यादीनि। स्वेदजानि च। यूकादीनि। उद्भिज्जानि च। वृक्षादीनि। अश्वा गावो पुरुषा हस्तिनो न्यच्च यत्किंचेदं प्रा
च णि किं तत् जंगमं। यच्च चलति पद्भ्यां गच्छति। यच्च पतत्रि। आकाशे पतनशीलं। यच्च स्थावरं। अचलं। सर्वं तत्। अशेषतः
नीयतेऽनेनेति नेत्रं सत्यं प्रज्ञानेत्रं। प्रज्ञप्तिः प्रज्ञा ब्रह्मैव नेत्रं प्रज्ञानेत्रं यस्य तदिदं प्रज्ञानेत्रं। प्रज्ञाने ब्रह्मण्युत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं। प्रज्ञाना
श्रयमित्यर्थः। प्रज्ञानेत्रो लोकः। पूर्ववत्। प्रज्ञा चक्षुर्वा सर्वे एव लोकः। प्रज्ञा प्रतिष्ठा सर्वस्यावगतिः। तस्मात्। प्रज्ञानं ब्रह्म।
तदेतत्प्रत्यस्तमितसर्वोपाधिनिर्विशेषं सन्निरंजनं निर्मलं निष्क्रियं शान्तमेकमद्वयं नेति नेतीति सर्वविशेषापोहसंवेद्यं स
र्वशब्दप्रत्ययागोचरं तदत्यंतविशुद्धं प्रज्ञोपाधिसंबंधेन सर्वज्ञमीश्वरसंज्ञं भवति। सर्वसाधारणाऽव्याकृतजगद्बीजप्रवर्त
कं नियंतृत्वादंतर्यामिसंज्ञं भवति। तदेव व्याकृतजगद्बीजभूतबुद्ध्यात्माभिमानलक्षणं हिरण्यगर्भसंज्ञं भवति। तदेवांतरंडोद्भू
तप्रथमशरीरोपाधिमद्विराट् प्रजापतिसंज्ञं भवति। तदुद्भूताग्न्याद्युपाधिमद्देवतादिसंज्ञं भवति। तथा विशेषशरीरोपाधि धि
ष्वपि ब्रह्मादिस्तंबपर्यंतेषु तत्तन्नामरूपलाभो ब्रह्मणः। तदेवैकं सर्वोपाधिभेदभिन्नं सर्वैः प्राणिभिस्तार्किकैश्च सर्वप्र
कारेण ज्ञायते विकल्प्यते चानेकधा।। एतमेके वदंत्यग्निं मनुमन्ये प्रजापतिं।। इंद्रमेके परे प्राणमपरे ब्रह्म शाश्वतमित्या
द्या स्मृतिः। स। वामदेवोऽन्यो वा। एवं यथोक्तं ब्रह्म वेद। प्रज्ञेनात्मना। प्रज्ञात्मना। येनैव प्रज्ञात्मना पूर्वे विद्वांसोऽमृता अभवन्।
तथायमपि विद्वानेतेनैव प्रज्ञात्मनास्माल्लोकादुत्क्रम्येत्यादि व्याख्यातं। अस्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्का
मानाप्त्वामृतः समभवत्समभवदित्यिति।। इत्यैतरेयोपनिषदि पंचमोऽध्यायः।। इति पंचमेन तत्वविद्यां परिसमाप्य षष्ठे १३
२शरीराभिमानादुत्थाय

१तस्य ब्रह्मणः। आविर्भूतस्वरूपं प्रकटीभूतं स्वरूपं तथाविधं दर्थं। आविरेधि। स्वग्रंथे आचीनमणिधीत्यत्र दीर्घछंदसे।। १आमंत्र्यते स्वप्रकाशं भवतीत्तद्ब्रह्मलोस्वरूपमामंत्र्यते। हे आविः। त्वं नेम

शांतिकरं मंत्रं पठति।। यथोक्ततत्वविद्याप्रतिपादकग्रंथपाठे प्रवृत्ता। मे मदीया। वाक्। सर्वदा। मनसि प्रतिष्ठिता। मन
सा यच्छब्दजातं विवक्षितं तदेव पठति।। मनः। मे। मदीयं। वाचि प्रतिष्ठितं। यद्यद्विद्याप्रतिपादकं वाच्यं शब्दजातमस्ति त
देव मनसा विवक्ष्यते।। एवमन्योन्यानुग्रहादेव वाङ्मनसी विद्यार्थग्रंथं साकल्येनावधारयितुं शक्नुतः।। मनसोऽवधानत्वा
भावे वागिंद्रियं सुप्तोन्मत्तप्रमत्तप्रलापादिवद्यत्किंचिदसंगतं ब्रूयात्।। तथा वाचः पाठाभावे सति गद्गदरूपया वाचावि
नु वक्षितं सर्वं यथावन्नोचार्यते।। अतस्तयोरन्योन्यानुकूल्यमस्त्वित्येवं प्रार्थ्यं।। आविः शब्देन स्वप्रकाशं ब्रह्म चैतन्यमुच्य
न ते।। प्रज्ञाशब्देन व्यवहृतत्वात्।। तस्याविर्भूतरूपं हि मा मां प्रति। म। मदर्थं। आविरेधि। अविद्याऽवधारणाऽपनयनेन प्रकटी
भव। देवाः। अत्रत्नसी। मे। मदर्थं। वेदस्य। यथोक्ततत्वविद्याप्रतिपादकस्य ग्रंथस्य। आणीस्थः। आनयनसमर्थे भवतां। मे
श्रुतं। मया श्रोत्रेणावगतं ग्रंथतदर्थजातं। मा प्रहासीः। मा परित्यजत। विस्मृतं मा भूदित्यर्थः। अनेनाधीतेन। ग्रंथेन विस्म
रणराहित्येन। अहोरात्रान्संदधामि। संयोजयामि। अहनि रात्रौ चालस्यं परित्यज्य निरंतरं पठामीत्यर्थः। अस्मिन्स्वहितेग्रं
थे। ऋतं परमार्थभूतं वस्तु। वदिष्यामि। विपरीतमर्थं वदनं कदाचिदपि मा भूदित्यर्थः।। ऋतं मानसं। सत्यं वाचिकं।। अ
धिके मनसा वस्तुतत्वं विचार्य्य काले शिष्याचार्ययोः पालयामीत्यर्थः।। तत्। मया वक्ष्यमाणं ब्रह्मतत्वं। मा। शिष्यं। अवतु।
सम्यक्बोधनेन पालयतु। तथा। तत्। ब्रह्मतत्वं। वक्तारं। आचार्यं। अवतु। बोधकत्वसामर्थ्यप्रदानेन पालयतु। पुन
रप्यवतु। मामित्याद्युक्तिः फलविषया। पूर्वं [illegible] साधनकाले शिष्याचार्ययोः पालनं प्रार्थितं।। इदानीं फलकालेऽपि
कार्य प्रार्थ्यते।। शिष्यस्याऽविद्यानिवृत्तिः फलं।। आचार्यस्य तु तादृशशिष्यदर्शनेन विद्यासंप्रदायप्रवृत्तिप्रयुक्तपरितोष

फलं॥ अनेन मंत्रपाठेनोभयोर्विद्योत्पत्तेः पुरा विद्याप्रतिबंधकाविघ्नाः परिह्रियंते॥ विद्योत्पन्नेस्तु कर्मसंभावना वि
परीतभावनोत्याद[illegible]का विघ्नाः परिह्रियंते॥ अवतु वक्तारमित्यभ्यासोऽध्यायसमाप्त्यर्थः॥ द्वितीयारण्यकसमा
प्त्यर्थश्च॥ ॥इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ
बह्वृचब्राह्मणोपनिषद्भाष्यं समाप्तं॥ षष्ठोऽध्यायश्च॥ ॥श्री॥ ॥श्री॥ ॥श्री॥
॥तपत्या दक्षिणे तीरे श्रीगुप्तेश्वरसंनिधौ॥ ऐतरेयोपनिषद्भाष्यं माधवानंदशोधितं॥ १॥ ऐतरेयोपनिषद्भाष्यं माधवानं
दपुस्तकं॥ दत्तं मधुराज्ञेन वीक्षणीयं सुबुद्धिभिः॥ २॥ मंगलं लेखकानां च पाठकानां च मंगलं॥ मंगलं शोधकानां च मंगलं स
र्वप्राणिनां॥ ३॥